National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(68): 158-160
© 2026 NJHSR
www.sanskritarticle.com

च . गौरीशङ्करः
शोधच्छात्रः, शैवागम विभागः,
श्री वेङ्कटेश्वर वेदविश्वविद्यालयः,
तिरुपतिः

Correspondence:
च . गौरीशङ्करः
शोधच्छात्रः, शैवागम विभागः,
श्री वेङ्कटेश्वर वेदविश्वविद्यालयः,
तिरुपतिः

श्रीमत् अंशुमदागमस्य विमर्शः

च . गौरीशङ्करः

लोकेषु विद्यमान स्थावर जङ्गमानां उपयोगाय ज्ञानप्राप्तये च साक्षात् परमेश्वरेन बहवः शास्त्राः तेषां मार्गाश्च निर्मितः । तेषु च ये मार्गाः, यानि च दर्शनानि पुरुषार्थत्रयेण परमपुरुषार्थमपि बोधयन्ति त एव वास्तविकज्ञानप्रदाः भवन्ति । तत्र आगमाः देवैरुपदिष्टाः अनादिकालादनुसार्यमाणाः आलयनिर्माणादिषु तथा पूजादिषु च प्रमाणीभूताः। तेषु च शैवागमाः शिवमुखोद्भूतत्वात् मूर्धन्यभूताः विराजन्ते। न केवलमालयनिर्माणादय, अपि तु तद्वारा मोक्षेऽप्येतेषां पर्यवसानन्तु सर्वसम्मतम् । परमेश्वरेण स्वयमुक्तत्वादेते शैवागमाः ज्ञानकोशशब्देन व्यवह्रियमाणैः ऋषिभिर्दृष्टैर्वेदैस्साकं साम्यं भजन्ते। तथा चोक्तं शैवपरिभाषायाम्- "वेदवदीश्वरमुखनिस्सृतत्वादेतेषामागमानां वेदवदेव प्रामाण्यम्" इति ।

चतुर्विधस्थानमपि आगमेषु निरूपितं शैवागममतानुसारिणां आत्मज्ञानप्राप्यै। तानि च स्थानानि सालोक, सामीप, सारूप, सायुज्यानि । अनेन शिवसायुज्यं प्राप्तवतां मनुष्याणां जनिमरणशृङ्खला विच्छिन्ना भवति, ते च परब्रह्मणि सदाशिवे स्थानं प्राप्नुवन्तीति सुनिश्चितं सुप्रसिद्धञ्च ।

तादृशानामागमानामनुसारेणालयेषु नित्य, नैमित्तक, काम्यक्रियाः प्रवर्तन्ते। तादृशीषु च क्रियासु उपयुज्यमानाः आगमाः इति। आधुनिककाले मूलागमाः लुप्ताः अलभ्यमानाः भवन्ति। अतः मूलागमानामुपागमानां च पुनरुद्धारणमनिवार्यमावश्यकं च। अनेन कारणेन कालेस्मिन् तालपत्रमाध्यमेषु स्थितेषु अंशुमदागमस्य पुनरुद्धारणं क्रियतेति अस्य शोधग्रन्थस्य सारः ।

आगमं नाम-

अनादिकालादारभ्य गुरुपरम्परया प्रसारितं शास्त्रम् आगमशब्देन व्यवहियते। ऐहिकामुष्मिकश्रेयः प्राप्यै ज्ञानप्रदाः ग्रन्थाः तन्त्रपदभाजाः। क्रमात्सम्बद्धाः ग्रन्थाः संहितापदेन व्यपदिश्यन्ते। अतः आगमतन्त्रसंहितादिपदैः समानाः ग्रन्था एव व्यवहियन्ते। एषु वेदाः अपि अनादिकालादारभ्य गुरुपरम्परया प्राप्यमाणाः आगमव्यपदेशार्हाः भवन्ति । आगमा अपि गुरुभ्यः स्मरणाच्छ्रुतिशब्देनापि व्यवहारयोग्याः भवन्ति । अतः भेदज्ञानाय वेदानां निगमपद व्यवहारः दृश्यते।

आगमाः शैववैष्णवशाक्तभेदेन त्रिविधाः भवन्ति । एषु शिवोत्कृष्टप्रतिपादकाः तस्य नित्यनैमित्तिक-काम्य बोधकाश्च ग्रन्थाः शैवागमाः। विष्णवुत्कृष्टप्रतिपादकाः वैष्णवागमाः शक्त्युत्कृष्टप्रतिपादकाः शाक्तागमा इति च व्यपदिश्यन्ते ।

आगमशब्दार्थः-

आगमशब्दस्य अर्थः एवं वर्ण्यते

आगतं शिववक्त्रेभ्यः गतं च गिरिजामुखे।
मतं च वासुदेनेन आगममित्यभिधीयते।।
अयमेव श्लोकः पाठभेदरूपेण बहुविधतया लक्ष्यते।
१. आगतं शिववक्त्रात्तु गतं च गिरिजानने।
मतं च वासुदेवस्य तस्मादागम उच्यते ।।
२. आगतं शिववकत्रेभ्यः गतं च गिरिजाश्रुतौ।
मतं श्रीवासुदेवस्य तस्मादागम उच्यते ।।

३. आगतं शिववक्त्रेभ्यः गतं च गिरिजाश्रुतौ ।
तदागम इति प्रोक्तं शास्त्रं परमपावनम् ।।३०

आगमपदस्य व्युत्पत्तिः अधोलिखितप्रकारेण बहुविधतया भवति।

१. आगच्छति परमात्मनो वक्त्रेभ्यो इत्यागमः ।

२. आसमन्ताद् अर्थं गमयतीति आगमः ।

३. आगच्छन्ति बुद्धिमारोहन्ति यस्माद् अभ्युदयनिःश्रेयसोपायाः स आगमः ।

४. अनवच्छिन्नप्रकाशपरमार्थः आगमः।

शिवागमस्य उपक्रमनम्-

"शिवेन स्थापितं शैवम्, शैवेन स्थापितं शिवम्" इत्युक्तत्वात् शिवशैवयोरभेदः ज्ञायते। शिवेन स्थापितत्वात् शैवम् इत्युच्यते, शैवेन निरूपितत्वात् शिवम् इत्युच्यते । शैवागमाः अष्टाविंशतिः । तथा चोक्तं कारणागमे –

"कामिकं योगजं चिन्त्यं कारणं त्वजितं तथा।
दीप्तं सूक्ष्मं सहस्रं च अंशुमान् सुप्रभेदकम् ।
विजयं चैव निश्वासं स्वायम्भुवमथानलम् ।
वीरं च रौरवं चैव मकुटं विमलं तथा।
चन्द्रज्ञानञ्च बिम्बं च प्रोद्गीतं ललितं तथा।
सिद्धं सन्तानसर्वोक्तं पारमेश्वरमेव च।
किरणं वातुळं चैव अष्टाविंशति संख्यया।।"[1]

इत्थं एते अष्टाविंशतिः शिवागमाः –

०१. कामिकम् ०२. योगजम् ०३. चिन्त्यम् ०४. कारणम् ०५.अजितम्०६.दीप्तम् ०७.सूक्ष्मम् ०८. सहस्रम् ०९.अंशुमान् १०.सुप्रभेदकम् ११.विजयम् १२.निश्वासम् १३.स्वायम्भुवम् १४.अनलम् १५.वीरम् १६.रौरवम् १७.मकुटम् १८.विमलम् १९.चन्द्रज्ञानम् २०.बिम्बम् २१.प्रोद्गीतम् २२.ललितम् २३.सिद्धम् २४.सन्तानम्२५.सर्वोक्तम्२६.पारमेश्वरम् २७.किरणम् २८.वातुलम्

सदाशिवस्य मुखपञ्चकात् अष्टाविंशतिशिवागमाः उत्पन्नाः।

तथा चोक्तं कारणागमे-

कामिकाद्यजितादीश्च सद्याजोत मुखोद्भव ।
दीप्तादिसुप्रभेदान्ता वामदेवमुखे ध्रुवम्।।
विजयारभ्य वीरान्ता पञ्च ते घोरमूर्तये।
रौरवान्तश्च बिम्बान्तं पुंवक्त्रे च समुद्भवम्।।[2]

प्रोद्गीताद्यष्टतन्त्राणि ईशानान सम्भवम्।

शिवस्य पञ्च मुखानि सन्ति।

१. सद्योजातम्, २. वामदेवम्, ३.अघोरम्, ४.तत्पुरुषम्, ५. ईशानम् इति।

एभ्यः पञ्चेभ्यः वक्त्रेभ्यः शिवेन उपर्युक्ता अष्टाविंशतिः शिवागमाः उद्भूताः।

ते च -

१. सद्योजातमुखात् उद्भूताः आगमाः -

१. कामिकम्	२.योगजम्	३. चिन्त्यम्
४. कारणम्	५. अजितम्	

२. वामदेवमुखात् उद्भूताः आगमाः

१. दीप्तम्	२. सूक्ष्मम्	३.सहस्रम्
४. अंशुमान्	५. सुप्रभेदम्	

३. अघोरमुखात् उद्धृताः आगमाः

१. विजयम्	२. निश्वासम्	३. स्वायम्भुवम्
४. अनलम्	५. वीरम्	

४. तत्पुरुषमुखात् उद्भूताः आगमाः

१. रौरवम्	२. मकुटम्	३. विमलम्
४. चन्द्रज्ञानम्	५. बिम्बम्	

६. ईशानमुखात् उद्भूताः आगमाः

१. प्रोद्गीतम्	२. ललितम्	३. सिद्धम्
४. सन्तानम्	५. सर्वोक्तम्	६.पारमेश्वरम्
७.किरणम्	८.वातुलम्	

एतेषाम् आगमानाम् उपागमाः सप्ताधिकशतद्वयसङ्ख्याकाः भवन्ति। ते च-

"तन्त्राणां कामिकादीनां ग्रन्थसंख्या प्रकीर्तिताः ।।
नारसिंहञ्च वक्त्रारं भैरवोत्तरमेव च ।
कामिकस्य त्रयो भेदा सुधा सन्तादितारकौ ।।
वीणा शिखोत्तरश्चैव आत्मयोगन्तथैव च ।
योगजस्य तु भेदानि पञ्चधा कीर्तितानि वै।।
पापनाशं परोद्भूतं सुचिन्त्यममृतान्वितम्।
सुभगं वामसंज्ञं तु चिन्त्यभेधास्तु षड्विधा ।।
माहान्तं कारणं तन्त्रं पावनं भीमसंहिता ।
विद्वेषं मारकञ्चैव सप्तधा कारणस्य तु ।।
पार्वती च परोद्भूतं प्रभूतं पद्मसंहिता ।
अजितस्य चतुर्भेदा अमेयाख्यमतः परम् ।।
असंख्यमब्जमश्चाद्यमानन्दममितौजसम् ।
अद्भुदं मानवोन्द्भुतमक्षयं दीप्तमेव च।।
सूक्ष्मस्य सूक्ष्ममेकन्तु अजितं मण्डलं तथा।
प्रमेयाजातिभागश्च प्रबुधं विबुधं तथा।।
हस्तशुद्धमलङ्कारं बोधं साहस्रकोदश।
काश्यपं वासवं नीलं लोहितं भूततन्त्रकम् ।।
विद्यापुराणमैन्द्रश्च आत्मालङ्कारमेव च।
वासिष्ठं गौतमं ब्राह्मं ईशानोत्तरमेव च।।
प्रकारणं तथाचांशुमानो द्वादशभेदकम् ।
सुप्रभेदं महाशास्त्रं अभेदमिति कीर्तितम् ।।
कौबेरश्चाथ विमलं सौम्यञ्श्चैव तथोद्भवम्।
मृत्युनाशमघोरश्च महाघोरमतः परम् ।
परमेश्वराच्च विजयं विजयस्याष्टभेदकाः ।।
निश्वासोत्तरतन्त्रञ्श्च मनो निश्वासमेव च।
निश्वासाख्यं महातन्त्रं निश्वासोर्ध्वमुखोदयम् ।
निश्वासनिधनश्चैव मन्त्रेनिश्वासमेव च।।
निश्वासकारिका चैव निश्वासं घोरमेव च।
निश्वासश्चाष्टधा प्रोक्तं प्रजापतिमतं तथा ।।
पन्यश्च द्विविधं विद्यात् स्वायम्भुवविशेषतः ।
आग्नेयं व्योमतन्त्रन्तु आग्नेयस्य द्विधामतम् ।।
प्रस्तरं फुल्लनयनं प्रबोधं बोधकन्तथा।
शकटं मोहविजयं प्रमोहं शकटासिकम् ।।
विलेघनं विलेभद्रं वीरतन्त्र्यं त्रयोदश।
कालाख्यं कालदहनं रौरवं रौरवोत्तरम् ।।

महाकालमतश्चान्द्रं रौरवे षड्विधं स्मृतम्।
मकुटोत्तरश्च मकुटं मकुटस्य द्विधा स्मृतम् ।।
वृषगुह्यं यथाक्रान्तं वृषभं वृषभोत्तमम् ।
सुदन्तमति भेदश्च रौद्रभेदं तथैव च।।
आरेवतं सुभद्रश्च अतिक्रान्तमलंकृतम् ।
अर्चितं त्वदृणासश्च अनन्तं मारणं तथा ।।
भेदो विमतन्त्रस्य षोडशोपरि कीर्तिताः ।
एकदशपुराणश्च स्थाण्वाख्या नन्दिकेश्वरम् ।।
स्थिराख्यं शङ्करप्रोक्तं श्रीमुखं शिवभक्तकम् ।
कल्पभेदमिति प्रोक्तं शिवसन्तानमेव च।।
देव्यामताख्यतन्त्रश्च शिवशेखरमेव च।
वारुणश्चैव वायव्यं चन्द्रज्ञानश्चतुर्विधम् ।।
चतुर्वक्त्रश्च संस्तोभं प्रतिबिम्बमयोगजम् ।
तुटिनीलश्च तौटीश्च अर्थालङ्कारमेव च।
तुलावृत्ययमेवश्च कुट्टिमाख्यलयोगतम् ।।
पट्टशेखरमेवश्च महाविद्या महासुरम्।
नैऋती तिथिविख्याश्च मुखं बिम्बस्य भेदकम् ।।
पिङ्गलामृद एवश्च दण्डयौ पाशबन्धकम् ।
परागं कवचं कौरं शिवज्ञानं धनुर्धरम् ।।
कालज्ञानश्च विज्ञानं आयुर्वेदश्च गन्तकम् ।
भरतश्च धनुर्वेदं मानोद्यं सर्वदंष्ट्रकम् ।।
प्रोद्गीताख्यस्य तन्त्रस्य भेदं षोडश एव च ।
ललितोत्तरकौमारं ललिताख्यमतःपरम् ।।
ललितस्य त्रयोभेदा शालाख्यं शक्तिमण्डलम् ।
सारोत्तरश्चमैशान्यं सिद्धतन्त्रं चतुर्विधम् ।।
अमेरशं सुराध्यक्षं लिङ्गाध्यक्षमसंख्यकम् ।
अनिलं शांकरं द्वन्द्वं सन्ताने सप्तभेदकाः ।।
ईशानं शिवधर्मश्च शिवधर्मोत्तरं तथा।
दिव्यप्रोक्तं कुबेराख्यं शार्वोक्तस्यैह पञ्चकम्।।
हंसं पद्मश्च मातङ्गं सामान्यं यक्षणं तथा।
पुष्कलं सुप्रियायोगं सप्तधा परमेश्वरे।।
गारुडं नैऋतं नीलं रूक्षं भानुकमेव च।
प्रबुद्धं येनकं बुद्धं कालाख्यं किरणेन च।।
वातुलोत्तरतन्त्रश्च कालज्ञानं पुरोहितम्।
श्रेष्ठं धर्मात्मकं शर्वं शुद्धं नित्यमहारमम् ।।
विश्वं विश्वात्मकं तत्वं द्वादशं स्मृतवातुले।
मूलभेदोपभेदाश्च समासात् परिकीर्तितम् ।।"

एवं मूलागमोपागमयोः भेदाः क्रमाश्च कामिकागमे तन्त्रावतार विधि पटले उच्यते ।

अंशुमदागमस्य परिचयः -

अष्टाविंशतिषु मूलागमेषु प्रथमदशमेषु आगमेषु (शिवभेदे) नवमतम आगमः अयं अंशुमदागमः । एवं –

"अंशुमानम्बु संज्ञस्य पञ्चलक्षेण कीर्तितः ।
अग्रश्चैवाम्बुसंज्ञाच्च अग्रात्प्राप्तः ततो रविः ।।
विद्यापुराणतन्त्रं च वासवं नीललोहितम् ।
प्रकारणं भूततन्त्रं आत्मालङ्कारमेवच ।।
काश्यपं गौतमं चैन्द्रं ब्राम्हं वासिष्ठमेवच ।
ऐशानं नामतः प्रोक्तं अंशुमान् द्वादशस्मृतः।।"[3] -इति

अयं आगमः प्रथमतः परमेश्वरेन अंबोः उपदिष्टं भवति , अंबुतः अग्रः प्राप्तवान् , अग्रात् प्राप्तः रविः इति भवति ।

किन्तु अयं च श्लोकः -

"भगवन् देवदेवेश लेकनाथ जगत्पते ।
आगमस्य प्रतिष्ठातु श्रोतुमिच्छामि तत्वतः।।
ईश्वर उवाच -
साधु साधु रवे प्राज्ञ यत्वया परिचोदितः।
आगमस्य पदार्थस्य तन्निर्वचनमुच्यते।"[4]

अनेन श्लोकेन साक्षात् सूर्य भगवता पृष्ट्वा श्रीपरमेश्वरेन उपदिष्टं इत्यपि ज्ञायते ।

अंशुमान् शब्दनिर्वचनः-

[5]अंशुमत् पुल्लिङ्ग शब्दः, अंशवः विद्यन्ते अस्य इति'। तदस्यास्तीति मतुप् । 'सूर्यः' ।।

"सगरस्यासमञ्जुस्तु असमञ्जांशुमान्
दिलीपोऽशुंमतः पुत्रो दिलीपस्य भगीरथः" ।।

पुराणकालेपि सूर्यवंशे जात सगरस्य पौत्रः, भगीरथस्य पितामहश्च अंशुमान् इति नाम्ना प्रकाशितवान्।

एवं अष्टाविंशति मूलागमाः सदाशिव मूर्तेः अङ्गीनः वर्तन्ते , तथा अयं अंशुमदागमः सदाशिव मूर्तेः पृष्ठभागं भवति 'अंशुमान् स्यात् पृष्ठतलं' ।

अष्टाविंशति मूलागमानां सप्ताधिकशतद्वय सङ्ख्याकाः उपागमाः भवन्ति , तेषु अंशुमदागमस्य द्वादश उपागमाः भाजिताः , ते -

विद्यापुराणतन्त्रम्, वासवम्, नीललोहितम्, प्रकरणम्, भूततन्त्रम्, आत्मालङ्कारम्, काश्यपम्, गौतमम्, ऐन्द्रम्, ब्राह्मम्, वासिष्ठम्, ईशानोत्तरम् इति ।।

अंशुमदागमस्य ग्रन्थ सङ्ख्या पञ्च लक्षः "पञ्चलक्षेण कीर्तितः"। किन्तु वर्तमान काले प्रायशः द्विसहस्रश्लेकाः अष्टनवति पटलान्तर्गताः एव लभ्यन्ते तेषु विंशति पटलाः अभिन्नरूपाः, मातृकाकान्तर (त्रयः) संबन्धाः एव लब्धाः । एनाः मातृकाः स्वीकृत्य पाठसंपादनं कृत्वा विमर्शीकृत्य यथामति परिशेध्य आविष्कारं क्रियते ।

शैवागमेषु अष्टाविंशतिसङ्ख्याकेषु प्रायशः लुप्तेष्वपि तालपत्रेषु, अस्मिन्काले सांप्रदायिकत्वेनैव सर्वाः क्रियाः प्रचारे भवन्ति । यत्र प्रचारेऽस्मिन् सन्देहो वैमत्यं वा भवन्तः तत्र ते मूलागमा एव प्रमाणीभूताः भवन्ति । एकस्मिन् आगमे अलभ्यमानाः विषयाः अन्यस्मिन् आगमे लभ्याः भवन्ति । अतः अमुद्रितावस्थायां स्थितानामागमानां पुनरुद्धारणविषये अंशुमदागमस्य आविष्कारेण सामाजिक उपयोगः भविष्यतीति अयमागमः स्वीकृत इति उपादेयता ।

सन्दर्भ ग्रन्थः

[1]पूर्वकारणागमः - तन्त्रावतारपटलः श्लोकाः ८ - ११।

[2]उत्तरकारणागमः तन्त्रावतारपटलः श्लोकाः ८१ ८३।

[3]कामिकागमः तन्त्रावतारविधि पटलः श्लो ४३-४५

[4]अंशुमदागमः आगमस्थापनविधि पटलःश्लो १-२

[5]इति त्रिकाण्डशेषः।